# ‘‘छात्राणां मूल्यांङ्कनार्थं परीक्षापयोगी प्रश्नावली’’

निर्मात्री
प्रो. ग़ज़ाला अंसारी
साहित्यविभागः
राष्ट्रियसंस्कृतसंस्थानम्
लखनऊपरिसरः, लखनऊ

# टिप्पणी

एते सर्वे प्रश्नाः छात्राणां मूल्याङ्कनार्थं सम्प्रेषिताः। मन्ये, यदि समाधानपुरस्सरं प्रश्नाः सञ्जाताः तर्हि छात्राणां मूल्याङ्कनं कथं भवितुमर्हति इति धिया प्रश्नोच्चयः एवाऽत्र प्रस्तूयते। सर्वेषां छात्राणां सविधे या पाठ्यसामग्री वर्तते, तासामेव एतेषां प्रश्नानां समाधानं वरीवर्ति। ते ध्यानेन पठित्वा तेषाम् अन्वेषणं कुर्वन्तु। समाधानं कृत्वा मां सूचयन्तु। यदि काचित् समस्या भवेच्चेत मां सम्पर्कयन्तु।

निर्मात्री

प्रो. ग़ज़ाला अंसारी

साहित्यविभागः

राष्ट्रियसंस्कृतसंस्थानम्

लखनऊपरिसरः, लखनऊ

# शास्त्रीद्वितीयवर्ष:

## पञ्चमपत्रम्

## साहित्यदर्पण: (षष्ठपरिच्छेद:)

1. साहित्यदर्पणस्य कर्त्ता क: ?
2. काव्यं कतिधामतम् ?
3. दृश्यकाव्यस्य कौ भेदौ जातौ ?
4. रूपकं कति विधम् ?
5. उपरूपकं कति विधम् ?
6. अभिनय: कतिविध: ?
7. दृश्यकाव्यं किमर्थं रूपकम् अपि उच्यते ?
8. गर्भाङ्कस्य किं लक्षणम् ?
9. विष्कम्भकस्य किं लक्षणम् ?
10. विष्कम्भकस्य कौ भेदौ ?
11. नाट्ये यत् नटाश्रयं संस्कृतवाग्व्यापारं भवति तत् किमुच्यते ?

12. नाटकस्य किं लक्षणम् ?

13. अवस्था: कति भवन्ति ?

14. प्रयत्न: क: उच्यते ?

15. अर्थप्रकृतय: कति भवन्ति ?

16. पताकास्थानकस्य किं लक्षणम् ?

17. प्रस्तावनाकतिविधा तस्या: किं लक्षणम् ?

18. आमुखस्य किं लक्षणम् ?

19. चूलिकाया: लक्षणं किम् ?

20. नान्द्या: लक्षणं लिखत ।

21. 'पूर्वरङ्गा पूर्वरङ्गा:' इत्यस्य कोऽभिप्राय: ?

22. भारतीवृत्ते: किं लक्षणम् ?

23. नाट्यसंश्रया: वृत्तय: कति भवन्ति ?

24. प्रवेशकस्य किं लक्षणम् ?

25. सात्वतीवृत्ती: कीदृशी ?

26. कार्यस्य कति अवस्था: भवन्ति ?

27. कौशिक्या: किं लक्षणम् ?

28. कति आमुखानि सन्ति ?

29. भयानकरसे का वृत्तिर्भवति ?

30. प्रहसनस्य किं लक्षणम् ?

31. विष्कम्भकप्रवेशकयोर्मध्ये क: भेद: ?

32. आहार्याभिनये किं भवति ?

33. मुखसन्धे: लक्षणं किम् ?

34. प्रहसननाटकयोर्मध्ये क: भेद: ?

35. प्रतिमुखसन्धे: कति अङ्गानि सन्ति ?

36. नाट्ये प्रवर्तकं किम् ?

37. श्रृङ्गाररसे का वृत्ति: भवति ?

38. सात्वतीवृत्ते: कति भेदा: ? द्वौ भेदौ लिखत ।

39. प्रयोगातिशयः कः ?

40. नाट्ये उद्घात्यकः कः ?

41. अङ्कावतारस्य किं लक्षणम् ?

42. प्रकरीपताकयोर्मध्ये कः भेदः ?

43. पताकालक्षणं किम् ?

44. प्रकरीलक्षणं किम् ?

45. फलागमस्य किं लक्षणम् ?

46. नाट्ये प्राप्त्याशा का ?

47. गर्भसन्धेः किं लक्षणम् ?

48. विमर्शसन्धेः किं लक्षणम् ?

49. निर्वहणसन्धेः किं लक्षणम् ?

50. परिकरस्य किं लक्षणम् ?

51. विलासस्य लक्षणं किम् ?

52. आरभटीवृत्तेः किं वैशिष्ट्यम् ?

53. भाणस्य स्वरूपं कीदृशम् ?

54. बीजस्य लक्षणं किम् ?

55. कोऽयं नर्मगर्भ: ?

56. खेदस्य किं लक्षणम् ?

57. कोऽयं विलास: ?

58. आक्षेप: क: ?

59. अभूताहरणस्य लक्षणं किम् ?

60. 'आधिकारिकं' इति पदस्य कोऽभिप्राय: ?

61. प्रासङ्गिकं कथावस्तु किम् ?

62. प्रकरणस्य स्वरूपं कीदृशम् ?

63. अङ्कगर्भाङ्कयोर्लक्षणं प्रतिपादयत।

64. को नाम अर्थोपक्षेपक ? सोदाहरणं प्रतिपादयत।

65. शिल्पकस्य स्वरूपं किं ? कानि च तस्याङ्गानि ?

66. साहित्यदर्पणोक्तानि लास्याङ्गानि प्रदर्शयत ।

67. लक्षणोदाहरणपुरस्सरं कार्यावस्थानां व्याख्या कार्या ।

68. व्यायोगस्य किं वैशिष्ट्यं, वर्णयत ।

69. वृत्तीनां स्वरूपं विलिख्य तद्भेदान् प्रतिपादयत ।

70. स्वाधीतग्रन्थदिशा नाटकस्य महत्त्वं परामृशत ।

71. अर्थप्रकृतीनां सविस्तरेण प्रतिपाद्यन्ताम् ।

72. सट्टकं किं ? तस्य लक्षणं स्पष्टयत ।

73. नाटिकालक्षणं किम् ?

74. त्रोटकस्य लक्षणं किम् ?

75. रासकस्य उदाहरणम् किम् ?

76. प्रेङ्खणस्य उदाहरणम् किम्?

77. संलापकस्य किमुदाहरणम्?

78. शिल्पके कति अङ्काः भवन्ति?

79. विलासिकायाः उदाहरणं किम्?

80. दुर्मल्लिकायां कति अङ्काः सन्ति?

81. श्रव्यकाव्यस्य किं लक्षणम्?

82. पद्यकाव्यं कीदृशम्?

83. महाकाव्यस्य लक्षणं स्पष्टयत।

84. 'सर्गः' कुत्र भवति?

85. महाकाव्यस्य उदाहरणं किम्?

86. खण्डकाव्यस्य किं लक्षणम्?

87. गद्यकाव्यस्य किं लक्षणं भेदसहितं स्पष्टयत।

88. कथाआख्यायिकयोर्मध्ये कः भेदः?

89. चम्पूकाव्यस्य लक्षणं किम्?